**Shloka** (in devanagari)

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ ३.२८ ॥

(in English)

tattvavittu mahābāhō guṇakarmavibhāgayōḥ |
guṇā guṇēṣu vartanta iti matvā na sajjatē || 3.28 ||

**Index Ref** 3rd chapter,28 of 43

**पदच्छेदः**

तत्त्ववित्,तु,महाबाहो,गुणकर्मविभागयोः ।
गुणा,गुणेषु,वर्तन्ते,इति,मत्वा,न,सज्जते ॥

**अन्वयार्थः** (Prose order with meaning & introduction to the word)

| | | |
|---|---|---|
| महाबाहो | महाबाहो (अर्जुन) ! | mighty-armed |
| गुणकर्मविभागयोः | चक्षुरादीनाम् इन्द्रियाणां दर्शनादीनां च क्रियाणां विभागयोः,पूर्वकृतकर्मगुणाधारयोः | of the divisions of Guna and Karma |
| तत्त्ववित् तु | याथातथ्येन ज्ञाता पुनः | knower of truth |
| गुणाः | चक्षुरादीनि इन्द्रियाणि बुद्धिः मनश्च | Gunas (in the shape of the senses) |
| गुणेषु | रूपशब्दादिषु | amidst the Gunas |
| वर्तन्ते | विद्यन्ते,स्थिरीभवन्ति | remain |
| इति मत्वा | इति ज्ञात्वा,इति विदित्वा | knowing this |
| न सज्जते | आत्मा सक्तो न भवति | not become attached |

**अर्थः** महाबाहो ! गुणकर्मविभागयोः तत्त्ववित् तु गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते ।

**Meaning** But, one, with true insight into the domains of Guna and Karma, knowing that Gunas as senses merely rest on Gunas as objects, does not become attached.

**तात्पर्यं** हे महाबाहो ! चक्षुः श्रोत्रादीनि ज्ञानेन्द्रियाणि, वाक्पाणिप्रभृतीनि कर्मेन्द्रियाणि, बुद्धिः मनश्च प्रकृतिजन्यानि इति गुणाः इत्युच्यन्ते । तानि च क्रमेण दर्शनश्रवणादौ वचनस्वीकारादौ अहङ्कारेण सङ्कल्पेन च प्रवर्तन्ते । च कदापि आत्मा एतेषु कर्मसु व्याप्रियते, निष्क्रियत्वात् । एवं गुणाः के, तेषां च क्रियाः काः इति ज्ञात्वा अयम् आत्मा तेभ्यः भिद्यते इति यः वस्तुस्थितिं विजानाति सः कदापि रूपशब्दादीनां दर्शनश्रवणादौ न ममतां प्राप्नोति ।

## व्याकरणम्

| | | | |
|---|---|---|---|
| **सन्धिः** | गुणा गुणेषु | - गुणाः + गुणेषु | विसर्गसन्धिः (लोपः) |
| | वर्तन्त इति | - वर्तन्ते + इति | यान्तावान्तादेशसन्धिः |
| **समासः** | गुणकर्मविभागयोः | - गुणः च कर्म च गुणकर्मणी - द्वन्द्वः । | |
| | | - गुणकर्मणोः विभागः, तयोः - षष्ठीतत्पुरुषः । | |
| | तत्त्ववित् | - तत्त्वं वेत्ति इति तत्त्ववित् - कर्तरि क्विप् उपपदसमासश्च । | |
| **कृदन्तः** | मत्वा | - मन् + क्त्वा । | |